Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४७६२

Title देवीकवचार्गलकीलकस्तोत्राणि

Author ×

Extent ९ पत्राणि Age ×

Subject तंत्रम्

देवी कवचार्गल कीलकस्तोत्राणि

४७६२

4762

F = 5

मणिना वलयं वलयेन मणिर्मणिना वलयेन विभाति करः कुसुमैर्हि वनं च वनैः कुसुमं
कुसुमैस्च वनैस्च विभाति नरः शशिना नु निशा निशया च शशी शशिना निशया
च विभाति खं पठनेन मतिर्मतिना पठनं मतिना पठनेन विभाति स्फुतर ॥२॥

गजा भोडुवेरा

ॐ श्रीगणेशाय नमः ॐ अस्य श्रीवज्रकवचमालामन्त्रमोपालस्य ब्रह्मा ऋषिः
चामुण्डा देवता श्रीमहालक्ष्मीप्रीत्यर्थे पाठे विनियोगः मार्कण्डेय उवाच यद्गु
ह्यं परमं लोके सर्वरक्षाकरं नृणां यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह १
श्रीब्रह्मोवाच अस्ति गुह्यतमं विप्र सर्वभूतोपकारकं देव्यास्तु कवचं पुण्यं तच्छृ
णुष्व महामुने २ प्रथमं शैलपुत्रीति द्वितीयं ब्रह्मचारिणी तृतीयं चन्द्रघण्टेति कू
ष्माण्डेति चतुर्थकं ३ पंचमं स्कन्दमातेति षष्ठं कात्यायनीति च सप्तमं कालरात्रि
महागौरीति चाष्टमं ४ नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः उक्तान्येता
नि नामानि ब्रह्मणैव महात्मना ५ अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे विष
मे दुर्गमे चैव भयार्ताः शरणं गताः ६ न तेषां जायते किंचिदशुभं रणसंकटे नाप
दं तस्य पश्यामि शोकदुःखभयं न हि ७ यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते

प्रेतसंस्थातुचामुंडावाराहीमहिषासना ८ ऐंद्रीगजसमारूढावैष्णवीगरुडासना
माहेश्वरीवृषारूढाकौमारीशिखिवाहना ९ लक्ष्मीपद्मासनादेवीपद्महस्ताहरि
प्रिया श्वेतरूपधरादेवीईश्वरीवृषवाहना १० ब्राह्मीहंससमारूढासर्वाभरणभू
षिता नानाभरणशोभाढ्यानानारत्नोपशोभिता ११ दृश्यंतेरथमारूढादेव्यः
क्रोधसमाकुलाः शंखंचक्रंगदांशक्तिंहलंचमुसलायुधं १२ खेटकंतोमरंचैवप
रशुंपाशमेवच कुंतायुधंत्रिशूलंचशार्ङ्गमायुधमुत्तमं १३ दैत्यानांदेहनाशाय भ
क्तानामभयायच धारयंत्यायुधानीत्थंदेवानांचहितायवै १४ नमस्तेस्तुमहारौ
द्रेमहाघोरपराक्रमे महाबलेमहोत्साहेमहाभयविनाशिनि १५ त्राहिमांदे
वि दुःप्रेक्षेशत्रूणांभयवर्द्धिनि प्राच्यांरक्षतुमामैंद्रीआग्नेय्यामग्निदेवता १६ दक्षि
णेऽवतुवाराहीनैरृत्यांखड्गधारिणी प्रतीच्यांवारुणीरक्षेद्वायव्यांमृगवाहिनी
उदीच्यांपातुकौमारीईशान्यांशूलधारिणी ऊर्ध्वंब्रह्माणीमेरक्षेदधस्ताद्वैष्णवीत

ष्ठा १८ एवंदशदिशोरक्षेद्वाराहेशाववाहना जयामेचाग्रतःस्थातुविजयास्थातु
पृष्ठतः १९ अजितावामपार्श्वेतुदक्षिणेचापराजिता शिखांमेद्योतिनीरक्षेदुमामू
र्ध्निव्यवस्थिता २० मालाधरीललाटेचभ्रुवोरक्षेद्यशस्विनी त्रिनेत्राचभ्रुवोर्मध्येयमघं
टाचनासिके २१ शंखिनीचक्षुषोर्मध्येश्रोत्रयोर्द्वारवासिनी कपोलौकालिकारक्षेत्क
र्णमूलेतुशांकरी २२ नासिकायांसुगंधाचउत्तरोष्ठेतुचर्चिका अधरेचामृतकला जि
ह्वायांचसरस्वती २३ दंतान्रक्षतुकौमारीकंठमध्येतुचंडिका घंटिकांचित्रघंटाचम
हामायाचतालुके २४ कामाक्षीचिबुकंरक्षेद्वाचंमेसर्वमंगला ग्रीवायांभद्रकाली
चपृष्ठवंशेधनुर्धरी २५ नीलग्रीवाबहिःकंठेनलिकांनलकूबरी खड्गधारिण्युभौस्कं
धौबाहूमेवज्रधारिणी २६ हस्तयोर्दंडिनीरक्षेदंबिकाचांगुलीषुच नखाञ्छूलेश्व
रीरक्षेत्कुक्षौरक्षेन्नलेश्वरी २७ स्तनौरक्षेन्महादेवीमनःशोकविनाशिनी हृदयेललिता
देवीउदरेशूलधारिणी २८ नाभौचकामिनीरक्षेद्गुह्यंगुह्येश्वरीतथा कट्यांभगवतीर २

देजानुनीविंध्यवासिनी पुत्रदाकामिकामेढ्रे गुदेमहिषवाहिनी जंघेमहाबलाशोका
सर्वकामफलप्रदा २० गुल्फयोर्नारसिंहीचपादपृष्ठेमितौजसी पादांगुलीः श्रीधरीच
पादाधःस्थलवासिनी २१ दंष्ट्राकरालिनीरक्षेत्केशांश्चैवोर्ध्वकेशिनी रोमकूपानिकौ
मारीत्वचंवागेश्वरीतथा २२ रक्तमज्जावसामांसमस्थिमेदांसिपार्वती अंत्राणिकाल
रात्रीचपित्तंचमुकुटेश्वरी २३ पद्मावतीपद्मकोशेकफेचूडामणिस्तथा ज्वालामुखी
नखज्वालामभेद्यासर्वसंधिषु २४ शुक्रंब्रह्माणिमेरक्षेच्छायांछत्रेश्वरीतथा अहंकारं
मनोबुद्धिंधर्मंचधर्मचारिणी २५ प्राणापानौतथाव्यानमुदानंचसमानकं वज्रहस्ता
चमेरक्षेत्प्राणंकल्याणशोभनं २६ रसेरूपेचगंधेचशब्देस्पर्शेचयोगिनी सत्वंरजस्तमश्चै
वरक्षेन्नारायणीतथा २७ आयुर्मेरक्षवाराहीधर्मंरक्षतुवैष्णवी चित्तंचरक्षलिंगणीयशः
कीर्तिंचबलंचमे २८ मेधांधृतिंस्मृतिंबुद्धिंलक्ष्मीरक्षतुवैष्णवी गोत्रमिंद्राणिमेरक्षेत्पशू
न्मेरक्षचंडिके २९ पुत्रान्रक्षेन्महादेवीभार्यांरक्षतुभैरवी पंथानंविपथारक्षेन्मार्गेक्षे

दु·क·
३

शंकरीतथा ४० लक्ष्मीराजकुलेरक्षेद्राघवीसर्वसंधिषु रक्षाहीनंतुयत्स्थानंवर्जितंक
वचेनतु ४१ तत्सर्वंरक्षमेदेवीजयंतीपापनाशिनी पदमेकंनगच्छेत्तुयदीच्छेच्छुभमात्
मनः ४२ कवचेनावृतोनित्यंयत्रयत्राधिगच्छति तत्रतत्रार्थलाभश्चविजयःसर्वकामि
कः ४३ यंयंचिंतयतेकामंतंतंप्राप्नोतिनिश्चितं परमैश्वर्यमतुलंप्राप्स्यतेविपुलंभुमा
नु ४४ निर्भयोजायतेमर्त्यःसंग्रामेष्वपराजितः त्रैलोक्येचभवेत्पूज्यःकवचेनावृतःपु
मान् ४५ इदंतुदेव्याःकवचंदेवानामपिदुर्लभं यःपठेत्प्रयतोनित्यंत्रिसंध्यंश्रद्धयान्वि
तः ४६ दैवीकलाभवेत्तस्यत्रैलोक्येष्वपराजितः जीवेद्वर्षशतंसाग्रमपमृत्युविवर्जितः
४७ नश्यंतिव्याधयःसर्वेलूताविस्फोटकादयः स्थावरंजंगमंचैवकृत्रिमंचापियद्विषं
४८ अभिचाराणिसर्वाणिमंत्रयंत्राणिभूतले भूचराःखेचराश्चैवजलजाश्चोपदेशिकाः
४९ सर्वहाकुशलामालाडाकिनीशाकिनीतथा अंतरिक्षचराघोराडाकिन्यश्चमहाब ३
लाः ५० ग्रहभूतपिशाचाश्चयक्षगंधर्वराक्षसाः ब्रह्मराक्षसवेतालाःकूष्मांडाभैरवादयः

५१ नश्यंति दर्शनात्तस्य कवचे हृदि संस्थिते मानोन्नतिर्भवेद्राज्ञां तेजो वृद्धिकरं परं ५२
यशसा वर्द्धते सोपि कीर्तिमंडितभूतले जपेत्सप्तशतीं चंडीं कृत्वा तु कवचं पुरा ५३ या
वद्भूमंडलं धत्ते सशैलवनकाननं तावत्तिष्ठति मेदिन्यां संततिः पुत्रपौत्रकी ५४ देहांते
परमं स्थानं यत्सुरैरपि दुर्लभं प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ५५ तस्माज्ज
पेत्सदा नित्यं कवचं कामदं शुभे ५६ इ गा गा हृ र ल · वि दे वं
चं सा मु · अ रु वा जयंती मंगला काली भद्रकाली
कपालिनी दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु ते १ मधुकैटभविद्राविविधा
तृवरदे नमः रूपं देहि जयं देहि यशो देहि द्विषो जहि २ महिषासुरनिर्नाशि धूम्राक्षस्य च म
र्दिनि रूपं देहि जयं देहि यशो देहि द्विषो जहि ३ चंडमुंडवधे देवि रक्तबीजविनाशिनि रू
पं ४ शुंभस्य च निशुंभस्य सर्वदैत्यनिपातिनि रूपं ५ वंदितांघ्रियुगे देवि सर्वसौभा
ग्यदायिनि रूपं ६ अचिंत्यरूपचरिते सर्वशत्रुविनाशिनि रूपं ७ नतेभ्यः सर्वदा भक्त्या

दु॰ स॰
४

ण्डिके व्याधिनाशिनि रूपं॰ ८ स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि रूपं ९
ण्डिके सततं ये त्वामर्चयन्तीह भक्तितः रूपं॰ १० देहि सौभाग्यमारोग्यं देहि देवि परं सु
खं रूपं॰ ११ देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि रूपं॰ १२ विधेहि द्विषतां नाशं विधेहि
बलमुच्चकैः रूपं॰ १३ विधेहि देवि कल्याणं विधेहि विपुलां श्रियं रूपं॰ १४ सुरासुरशि
रोरत्ननिघृष्टचरणेऽम्बिके रूपं॰ १५ विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु रूपं १६ प्र
चण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे रूपं १७ चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि रूपं १८
कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके रूपं १९ हिमाचलसुतानाथसंस्तुते परमे
श्वरि रूपं २० इन्द्राणीपतिसद्भावपूजिते परमेश्वरि रूपं २१ देवि भक्तजनोद्दामदत्तानन्दोद
येऽम्बिके रूपं २२ पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीं तारिणीं दुर्गसंसारसागरस्य
कुलोद्भवां २३ इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः सप्तशतीं समाराध्य वरमाप्नोति
सपदः २४ ३ श्री स्तुतिः ॥३॥ ऋ कृ च विष्णुदत्तानन्दराघवत्रिवेदीदिव्यच ४

5

षे श्रेयःप्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे १ सर्वमेतद्विजानीयान्मंत्राणामभि
कीलकं सोपि क्षेममवाप्नोति सततं जाप्यतत्परः २ सिद्ध्यंत्युच्चाटनादीनि वस्तूनि सक
लान्यपि एतेन स्तुवतां देवि स्तोत्रमंत्रेण सिद्ध्यति ३ न मंत्रो नौषधं तत्र न किंचिदपि विद्य
ते विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकं ४ समग्राण्यपि सिद्ध्यंति लोकशंकामि
मां हरः कृत्वा निमंत्रयामास सर्वमेवमिदं शुभं ५ स्तोत्रं वै चंडिकायास्तु तच्च गुह्यं चकार
सः समवाप्नोति पुण्येन तां यथावन्निमंत्रणं ६ सोपि क्षेममवाप्नोति सर्वमेव न संश
यः कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ७ ददाति प्रतिगृह्णाति नान्यथैषा प्र
सीदति इत्थंरूपेण कीलेन महादेवेन कीलितं ८ यो निष्कीलां विधायैनां नित्यं जप
ति संस्फुटं स सिद्धः स गणः सोपि गंधर्वो जायते वने ९ न चैवाप्यटतस्तस्य भयं क्वापि
न जायते नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् १० ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वा
णो विनश्यति ततो ज्ञात्वैव संपन्नमिदं प्रारभ्यते बुधैः ११ सौभाग्यादि च यत्किंचिद्दृश्य

श्री॰
५

[redacted] तेलत्वनाजने तत्संवैत्वत्प्रसादेनूतेनज्ञानमिदंशुभं १२ ध्रानेत्सुज्ञात्व
मानेत्रिस्मिन्त्रोत्रेसंवन्निरूच्चकैः भवत्येवममस्तीतिततः प्रारभ्यमेवतत्र १२ ऐश्वर्यंत्व
त्प्रसादेनसौभाग्यारोग्यसंपदः शत्रुहानिःपरोमोक्षःस्तूयतेस्मानकिंजनैः १९॥
३ श्रीऽम स्मा ल स श्मर ॥ पयःपृथिव्यांपयओषधीषुपयोदिव्यन्तरिक्षेपयो
याःपयस्वतीःप्रदिशःसन्तुमह्यम् विष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसिवैष्णवमसिवि
ष्णवेत्वा
विष्णोःस्यूरसि ८